MSS No. 139 Subject Language

Name of MSS कारिकावली ; अथवा, मुक्तावलिन्याकार

Author विश्वनाथ पंचानन भट्टाचार्य कृत

Period — — Folios 012

Script Sanskrit Source Prithipal Singh

Missing Folios

कारकावलीपुस्तकब्रह्मदासचेलेमहंत
दामोदरदासजीकेदाप१२

का
१

प्रतियोगिज्ञानाधीन
यद्ज्ञानं तादृशज्ञान
विषयत्वम् ५। सं ४

ॐ श्रीगणेशायनमः ॐ अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवं तन्नरं वपु
षिकुंजरंमुखे मन्महे किमपि तुंदिलंमहः १ नूतनजलधररुचये गोपवधूटीदुकू
लचौराय तस्मैकृष्णायनमः संसारमहीरुहस्यबीजाय २ द्रव्यंगुणस्तथाकर्मसा
मान्यंसविशेषकं समवायस्तथाभावः पदार्थाः सप्तकीर्तिताः ३ क्षित्यप्तेजोमरु
द्व्योमकालदिग्देहिनोमनः द्रव्याण्यथगुणारूपंरसोगंधस्ततःपरं ४ स्पर्शःसं
योगश्चविभागश्चपरत्वंचापरत्वकं ५ बुद्धिःसुखंदुःखमिच्छाद्वेषोयत्नोगुरु
त्वकं द्रवत्वंस्नेहसंस्कारावदृष्टंशब्दएवच ६ उत्क्षेपणंतथाऽपक्षेपणमाकुं
चनंतथा प्रसारणंचगमनंकर्माण्येतानिपंचच ७ भ्रमणंरेचनंस्यंदनोर्द्ध्वज्व
लनमेवच तिर्यग्गमनमप्यत्रगमनादेवलभ्यते ८ सामान्यंद्विविधंप्रोक्तंप
रंचापरमेवच द्रव्यादित्रिकवृत्तिस्तुसत्तापरतयोच्यते ९ परभिन्नाचयाजा

ख्यापरिमितिःपृथक्त्वंचततःपरं
१

मेरुत्वन्दोषप्रागादि
नामपि गमनेन नर्मा
योऽस्ति तिचेन्न स
न त्रेच्छस्य समनेर्ति
योगपर्यन्तयोगा
न्तर्ले त्यादि ति भावः २ परत्वव्याधिके देशवृत्तित्वम् १
अपरत्वमल्पदेशवृत्तित्वम् २।२

निः सैवापरतयोच्यते द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ९ व्यापक-
त्वात्परापि स्याद्व्याप्यत्वादपरापि च अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्त्ति- अन्त्योऽवसाने वर्त्तत इत्यन्त्यः यदपे क्षिया विशेषो नास्तीत्यर्थः २ चकारात् द्रव्यगुणकर्मसु ३
तः १० घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः तेषु जातेश्च सम्बन्धः सम-
वायः प्रकीर्त्तितः ११ अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः प्रागभावस्त-
था ध्वंसोप्यत्यन्ताभाव उच्यते १२ एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते स-
ज्ञेयत्व अभि धेयत्व प्रमेयत्व
ज्ञेयत्वं ज्ञानविषयत्वं । अभिधेयत्वं ईश्वरेच्छाविषयत्वं । प्रमेयत्वं ईश्वरप्रमाविषयत्वं ५ प्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते १४ द्रव्यादयः पञ्च भावा अनेके सम-
वायिनः सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः १५ सामान्यपरिहीनास्तु
सर्वे जात्यादयो मताः पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतं १६ अन्य-
था सिद्धिशून्यस्य नियता पूर्ववर्त्तिता कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्त्तितं १७
समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वं एवं न्यायनयज्ञैस्तृतीयमुक्तं

का

२

निमित्तहेतुत्वं १८ यत्समवेतं कार्यं भवत्येवेह समवायिजनकं तत् तत्रासन्नं जन
कं द्वितीयमाभ्यां परं तृतीयं स्यात् १९ येन सह पूर्वभावः कारणमादाय वा यस्य अन्यं
प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञाने २० जनकं प्रति पूर्ववर्तितामपरिज्ञाय न यस्य
गृह्यते अतिरिक्तमथापि यद्भवेत् नियतावश्यकपूर्वभाविनः २१ एते पंचान्यथासि
द्धा दंडत्वादिकमादिमं घटादौ दंडरूपादिः द्वितीयमपि दर्शितं २२ तृतीयं तु भवेद्व्यो
मकुलालजनकोऽपरः पंचमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ २३ समवा
यिकारणत्वं द्रव्यस्यैवेति विज्ञेयं गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतु
त्वं २४ अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते क्षित्यादीनां नवानां तु द्रव्यत्वं
गुणयोगिता २५ क्षितिर्जलं तथा तेजः पवनो मन एव च परापरत्वमूर्तत्वक्रि
यावेगाश्रया अमी २६ कालखात्मदिशां सर्वगतत्वं परमं महत् क्षित्यादि पं

१अ कार्यत्वं घटत्वं समवायिकार
णत्वं तेन रूपेण घटं प्रति कार
ण कारणत्वेऽन्यथासिद्धत्वम्
२अन्यं प्रति यदादन्यं प्रति
हं प्रतीत्यर्थः

घटं प्रति पूर्वभावं नाम पूर्ववृत्तित्वं
येन दंडरूपेण सह गृह्यते तद्दंड
त्वं घटं प्रति अन्यथासिद्धम् १।२
घटं प्रति यस्य नाम दंडरूपस्य पूर्व
भावः नाम पूर्ववृत्तित्वे कारणात् द
ण्डमादाय गृह्यते तद्दंडरूपं घटं
प्रत्यन्यथासिद्धम् २।२
हैते जैसे कुलालपिता कोयता २

अन्यो ग्रामतेनैवचरितार्थत्वा
दिति भावः पती

मूर्तित्वं च अपरिच्छिन्नपरिमाण
वत्त्वम् १

२

मूर्तत्वंचबहिरिंद्रियग्राह्यविशेषगुणवत्वम् १

अव्याप्यवृत्तित्वंक्षणिकत्वंचात्मनाभा
वसमानाधिकरणत्वम् १२
क्षणिकत्वञ्चतृतीयक्षणवृत्ति
ध्वंसप्रतियोगित्वम् २१२

वभूतानिचत्वारिस्पर्शवन्तिहि २७ द्रव्यारंभश्चतुर्षुस्यात्तथाकाशशरीरिणां अ
व्याप्यवृत्तिःक्षणिकोविशेषगुणइष्यते २८ रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्त्रय
गुरूणिद्वेरसवतीद्वयोर्नैमित्तिकोद्रवः २९ आत्मनोभूतवर्गस्यविशेषगुणयो
गिनः यदुक्तंयस्यसाधर्म्यंवैधर्म्यमितरस्यतत् ३० स्पर्शादयोष्टौवेगाख्यःसंस्का
रोमरुतोगुणाः स्पर्शाद्यष्टौरूपवेगौद्रवत्वंतेजसोगुणाः ३१ स्पर्शादयोष्टौवेग
स्त्वद्रवत्वंचगुरुत्वकं रूपंरसस्तथास्नेहोवारिण्येतेचतुर्दश ३२ स्नेहहीनाः
गंधयुताः क्षितावेतेचतुर्दश बुद्ध्यादिषट्कंसंख्यादिपंचकंभावनातथा ३३ ध
र्माधर्मौगुणाएतेचात्मनःस्युश्चतुर्दश संख्यादिपंचकंकालदिशोःशब्दश्चतेच शा
खे ३४ संख्यादयः पंचबुद्धिरिच्छायत्नोपिचेश्वरे परापरत्वेसंख्याद्याःपंचवेगश्च
श्चमानसे ३५ वायोर्नवैकादशतेजसोगुणाः जलक्षितिप्राणभृतांचतुर्दश

को॰ दिक्कालयोः पंचषडेव चांवरे महेश्वरेष्टौ मनसस्तथैव च ३६ तत्र क्षितिर्गंध
हेतुर्नानारूपवती मता षड्विधस्तु रसस्तत्र गंधस्तु द्विविधो मतः ३७ स्पर्शस्त
३ स्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः नित्यानित्या च सा द्वेधा नित्या स्यादणुल
क्षणा ३८ अनित्या तु तदन्या स्यात्सैवावयवयोगिनी सा च त्रिधा भवेद्देहमिं
द्रियं विषयस्तथा ३९ योनिजादि भवेद्देहमिंद्रियं घ्राणलक्षणं विषयो द्व्यणुका
दिस्तु ब्रह्मांडांत उदाहृतः ४० वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ स्नेह
स्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतं ४१ नित्यतादि प्रथमवत्किंतु देहमयोनिजं
इंद्रियं रसनं सिंधुहिमादिर्विषयो मिजेः इंद्रियं रसनं सिंधुहिमादिर्विषयो मतः ४२
स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरं नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत्
४३ इंद्रियं नयनं वह्निस्वर्णादिर्विषयो मतः अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने ३

पो यं वायुर्वाति स्पति ॥ अनुष्णाशीतस्पर्शो
भाव्यते सः क्वचिदाश्रितः गुणत्वात् रूपवत् २

मतः ४४ तिर्यग्गमनवानेषः ज्ञेयः स्पर्शादिलिंगकः पूर्ववन्नित्यताद्युक्तं देहव्यापि
त्वगिंद्रियं ४५ प्राणादिस्तु महावायुपर्यंतो विषयो मतः आकाशस्य तु विज्ञेयः श
ब्दो वैशेषिको गुणः ४६ इंद्रियं च भवेच्छ्रोत्रमेकः सन्नप्युपाधितः जन्यानां जनकः
कालो जगतामाश्रयो मतः ४७ परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः दूरां
तिकादिधीहेतुरेका नित्या दिगुच्यते ४८ उपाधिभेदादेकापि प्राच्यादिव्यपदेशभा
क् आत्मेंद्रियाद्यधिष्ठाता करणं हि सकर्तृकं ४९ शरीरस्य न चैतन्यं मृतेषु व्यभि
चारतः तथात्वमिंद्रियाणां चेदुपघाते कथं स्मृतिः ५० मनोपि न तथा ज्ञानाद्य
नध्यक्षं तदा भवेत् धर्माधर्माश्रयोध्यक्षो विशेषगुणयोगतः ५१ प्रवृत्त्याद्यनुमे
यो यं रथगत्येव सारथिः अहंकारस्याश्रयोयं मनोमात्रस्य गोचरः ५२ विभुर्बुद्ध्या
दिगुणवान्बुद्धिस्तु द्विविधा मता अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधं यः ५३

को॰
४

प्रत्यक्षमप्यनुमितिस्तथोपमितिशाब्दजे घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतं ५४ घ्रा
णस्य गोचरो गंधो गंधत्वादिरपि स्मृतः तथा रसो रसज्ञायास्तथा शब्दोपि च श्रुतेः ५५
उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वंति पृथक्त्वसंख्ये विभागसंयोगपरापरत्व स्ने
हद्रवत्वं परिमाणयुक्तं ५६ क्रियाजातिं योग्यवृत्तिः समवायञ्च तादृशं गृह्णाति
चक्षुः संयोगादालोकोद्भूतरूपयोः ५७ उद्भूतस्पर्शवद्द्रव्यं गोचरः सोपि च त्वचः सोपि उद्भूतस्पर्शोपि स्य शत्वगिन्द्रियहितः ५
रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणं ५८ द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञान त्वङ्मनोयोगो ज्ञानसामान्ये कारणमपि ५
कारणं मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ५९ ज्ञानं यन्निर्विकल्पाख्यं
तदतीन्द्रियमिष्यते महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतं ६० विषयेन्द्रियसंबंधो व्या
पारः सोपि षड्विधः द्रव्यग्रहस्तु संयोगात्संयुक्तसमवायतः ६१ द्रव्येषु समवेतानां का
तथा तत्समवायतः तत्रापि समवेतानां शब्दस्य समवायतः ६२ तद्वृत्तीनांतसम
४

वेतसमवायेनतद्ग्रहः विशेषणतयातद्वदभावानांग्रहोभवेत् ६३ यदिस्या
दुपलभ्येतेत्येवंयत्रप्रसज्यते प्रत्यक्षेसमवायस्यविशेषणतयाभवेत् ६४ अ
लौकिकस्तुव्यापारस्त्रिविधःपरिकीर्तितः सामान्यलक्षणोयोगजस्तथा ज्ञानलक्षणो २
इन्द्रियसम्बद्धविशिष्यकज्ञानप्रकारीभूतसामान्यवत्वरूपः सामान्यज्ञानलक्षणा ४=
६५ आसत्तिराश्रयाणांतुसामान्यज्ञानमिष्यते तदिंद्रियजतद्धर्मबोधसा
मग्र्यपेक्षिता ६६ विषयीयस्यतस्यैवव्यापारोज्ञानलक्षणा योगजोद्विविधा
स्वसंयुक्तमनस्संयुक्तआत्मसमवेतज्ञानविषयत्वरूपः ज्ञानलक्षणा = ४
प्रोक्तायुक्तयुंजानभेदतः ६७ युक्तस्यसर्वदाभानंचिन्तासहकृतोपरः व्या
पारस्तुपरामर्शकरणंव्याप्तिधीर्भवेत् ६८ अनुमायांज्ञायमानेलिंगंतुक
रणंनहि अनागतादिलिंगेननस्यादनुमितिस्तदा ६९ व्याप्यस्यपक्षवृत्ति

साध्यवदन्यावृत्तित्वं हेतोर्व्याप्तिः ॥ तथा च साध्यवत्प्रतियोगिताकभेदाधिकरण
निरूपितवृत्तित्वाभावो हेतौ व्याप्तिः १ हेतुः समानाधिकरणात्यंताभावाप्रति
योगिसाध्यसामानाधिकरण्यं व्याप्तिः २

का
५

त्वथीः परामर्श उच्यते व्याप्तिः साध्यवदन्यास्मिन्नसंबंध उदाहृतः ७० अथवा
हेतुमन्निष्ठविरहाप्रतियोगिना साध्येन हेतोरेकाधिकरण्यं व्याप्तिरुच्यते ७१
सिसाधयिषया शून्या सिद्धिर्यत्र न तिष्ठति स पक्षस्तत्र वृत्तित्वज्ञानादनुमिति (सिसाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता ३)
र्भवेत् ७२ अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः कालात्ययापदिष्टश्च हे
त्वाभासस्तु पंचधा आद्यः साधारणस्तु स्यादसाधारणकोऽपरः तथैवानुपसंहा
(पक्षापक्षेतरो वह्निमान् द्रव्यत्वात्)
री त्रिधानैकांतिको भवेत् ७४ यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः य (निश्चितसाध्यवान् सपक्षः निश्चितसाध्याभाववान् विपक्षः)
स्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मतः ७५ तथैवानुपसंहारी केवला
न्वयिपक्षकः यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ७६ आश्रया

५

शब्दोऽनित्यः कृतकत्वात् ४
घटवत् शब्दोऽनित्यः श्राव
णत्वात् शब्दवत् नित्यत्वाभा
ववव्याप्य कृतकत्ववान् शब्दः
अनित्यत्वाभाववव्याप्यश्राव
णत्ववान् शब्दः ४

सिद्धिराद्या स्वरूपासिद्धिरप्यथ व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ७७
पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः ह्रदो द्रव्यं धूमवत्वादत्रासिद्धिरथा
परा ७८ व्याप्यत्वासिद्धिरपरा नीलधूमादिको भवेत् विरुद्धयोः पराम
र्शे हेत्वोः सत्प्रतिपक्षता ७९ साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः उ
त्पत्तिकालीनघटे गंधादिर्यत्र साध्यते ८० इत्यनुमानं ग्रामीणस्य प्रथमतः
पश्यतो गवयादिकं सादृश्यधीर्गवादीनां या स्यात्सा करणं मतं ८१ वाक्या
र्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते गवयादिपदानां तु शक्तिधीरुपमाफ
ले ८२ इत्युपमानं पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः शाब्दबोधः फलं त

का ९
स्पर्शाश्रियीः सहकारिणी ८३ लक्षणा शक्यसंबंधस्तात्पर्यानुपपत्तितः आ
सत्तिर्योग्यताकांक्षातात्पर्यज्ञानमिष्यते ८४ कारणं सन्निधानं तु पदस्यासत्ति
रुच्यते पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ८५ यत्पदेन विना यस्याननु
भावकता भवेत् आकांक्षा वक्तुरिच्छा तु तात्पर्यं परिकीर्तितं इति शाब्दबोधः
८५ साक्षात्कारे सुखादीनां करणं मन उच्यते अयोगपद्याज्ज्ञानानां तस्याणु
त्वमिहेष्यते ८७ अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः रूपं रसः
स्पर्शगंधौ परत्वमपरत्वकं ८८ द्रवो गुरुत्वं स्नेहश्च वेगो मूर्तगुणा अमी ध
र्माधर्मौ भावना च शब्दो बुद्ध्यादयोपि च ८९ एते मूर्तगुणाः सर्वे विद्वद्भिः ९

परिकीर्त्तिताः संख्यादिरपविभागांतउभयेषांगुणोमतः ९० संयोगश्च
विभागश्चसंख्याद्वित्वादिकास्तथा द्विपृथक्त्वादयस्तद्वदेतेनेकाश्रितागु
णाः ९१ अतः शेषगुणाः सर्वेमताः एकैकवृत्तयः बुद्ध्यादिषट्कंस्पर्शांताः
स्नेहः सांसिद्धिकोद्रवः ९२ अदृष्टभावनाशब्दाअमीवैशेषिकागुणाः सं
ख्यादिरपरत्वांतोद्रवत्वंस्नेहएवच ९३ एतेतुद्वींद्रियग्राह्याः अथस्पर्शां
तशब्दकाः बाह्यैकैकेंद्रियग्राह्यागुरुत्वादृष्टभावनाः ९४ अतींद्रियावि
भूनांतयेस्युर्वैशेषिकागुणाः अकारणगुणोत्पन्नाएतेतुपरिकीर्त्तिताः
९५ अपाकजास्तुस्पर्शांताद्रवत्वंचतथाविधं स्नेहवेगगुरुत्वैकपृथ

का
८

त्वपरिमाणके ९७ स्थितिस्थापकरत्येतेस्युःकारणगुणोद्भवाः संयोग
श्चविभागश्चवेगश्चैतेतुकर्मजाः ९८ स्पर्शान्तपरिमाणैकपृथक्त्वस्नेह
शब्दके भवेदसमवायित्वमथवैशेषिकेगुणे ९९ आत्मनःस्यान्निमित्तत्व
उष्णस्पर्शगुरुत्वयोः वेगेपिचद्रवत्वेचसंयोगादिद्वयेतथा १०० द्विधैवका
रणत्वंस्यादथप्रादेशिकोभवेत् वैशेषिकोविभुगुणःसंयोगादिद्वयंत
था १०१ चक्षुर्ग्राह्यंभवेद्रूपंद्रव्यादेरुपलंभकं चक्षुषःसहकारिस्याच्छुक्ला
दिकमनेकधा १०२ जलादिपरमाणौतन्नित्यमन्यत्सहेतुकं रसस्तुरस
नाग्राह्योमधुरादिरनेकधा १०३ सहकारीरसज्ञायानित्यतादिचपूर्वव

८

वत् घ्राणग्राह्यो भवेद्गंधो घ्राणस्यैवोपकारकः १४ सौरभश्चासौरभश्च स द्वेधा
परिकीर्तितः स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः ५ अनुष्णाशीतशी
तोष्णभेदात्स त्रिविधो मतः काठिन्यादिक्षितावेव नित्यतादि च पूर्ववत् ६ एते
षां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित् तत्रापि परमाणौ स्यात् पाको वैशेषिके न
ये ७ नैयायिकानां तु नये द्व्यणुकादावपीष्यते गणनाव्यवहारे तु हेतुः सं
ख्याभिधीयते ८ नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते द्वित्वादयः परार्धान्ता नित्ये २
अपेक्षाबुद्धिजा मताः ९ अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः अपेक्षाबु
द्धिनाशाच्च तेषां नाशो निरूपितः १० अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरिष्यते।

को॰
८

परिमाणं भवेन्मानव्यवहारस्य कारणं ११ अणुदीर्घं महद्ध्रस्वमिति तद्भेद ईरितः अ
नित्ये तदनित्यं स्यान्नित्ये नित्यमिहेष्यते १२ संख्यातः परिमाणाच्च प्रचयादपि जायते
अनित्यं द्व्यणुकादौ तु संख्याजन्यमुदाहृतं १३ परिमाणं घटादौ तु परिमाणजमुच्यते
प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते १४ परिमाणं तूलकादौ नाशस्त्वाश्र
यनाशतः संख्यावत्तु पृथक्त्वं स्यात्पृथक्प्रत्ययकारणं १५ अन्योन्याभावतो ना
स्य चरितार्थत्वमिष्यते अस्मात्पृथगिदं नेति प्रतीतिर्हि विलक्षणा १६ अप्राप्तयोः
स्तु या प्राप्तिः सैव संयोग ईरितः कीर्तितस्त्रिविधस्त्वेषः आद्योन्यतरकर्मजः १७ त
थोभयस्पंदजन्यो भवेत्संयोगजोऽपरः आदिमः श्येनशैलादिसंयोगः परिकी॰

र्त्तितः १८ मेषयोः सन्निपातो यः स द्वितीय उदाहृतः कपालतरुसंयोगात्संयोग
स्तरुकुंभयोः १९ तृतीयः स्यात्कर्मजोपि द्विधैव परिकीर्तितः अभिघातो नोदनं च
शब्दहेतुरिहादिमः २० शब्दाहेतुर्द्वितीयः स्याद्विभागोपि त्रिधा भवेत् एककर्मो
द्भवस्त्वाद्यो द्वयकर्मोद्भवोपरः २१ विभागजस्तृतीयः स्यात्तृतीयोपि द्विधा भवेत् ।
हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः २२ परत्वं चापरत्वं च द्विविधं परिकीर्तितं
दैशिकं कालिकं चापि मूर्त एव तु दैशिके २३ परत्वं देशसंयोगभूयस्त्वज्ञानतो भवे
त् अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितं २४ तयोरसमवायी स्याद्दिक्संयोगस्तदा
श्रये दिवाकरपरिस्पंदभूयस्त्वज्ञानतो भवेत् २५ अपेक्षाबुद्धिनाशेन नाशस्तेषाम्

का
६

दाहृतः बुद्धेः प्रपंचः प्रागेव प्रायशो विनिरूपितः २६ अथावशिष्टोप्यपरः प्रकारः
परिदर्श्यते अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते २७ तच्छून्ये तन्मतिर्या स्याद
प्रमा सा निरूपिता तत्प्रपंचो विपर्यासः संशयोपि प्रकीर्तितः २८ आद्यो देहेष्वा
त्मबुद्धिः शंखादौ पीततामतिः भवेन्निश्चयरूपा या संशयोथ प्रदर्श्यते २९ किं
स्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः तदभावाप्रकारा धीस्तत्प्रकारा तु नि
श्चयः ३० संशयो मतिर्या स्यादेकत्राभावभावयोः साधारणादिधर्मस्य ज्ञानं सं
शयकारणं ३१ दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् पित्तदूरत्वादिरू
पो दोषो नानाविधो मतः ३२ प्रत्यक्षे तु विशेष्येण विशेषणवता समं सन्निक ६

र्षो गुणस्तु स्यादथ त्वनुमितौ पुनः २२ पक्षे साध्यविशिष्टे च परामर्शो गुणो भवे
त् शाब्दे सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः २३ शाब्दबोधे योग्यतायास्तात्प
र्यस्याथवा प्रमा गुणः स्याद्भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा २४ अथवा तत्प्रका
तद्विशेष्यकत्वे सति तत्प्रकारकं ज्ञानं प्रमा ४ रं यत्तु ज्ञानं तद्विशेष्यकं तत्प्रमा न प्रमा नापि भ्रमः स्यान्निर्विकल्पकं २५
प्रकारतादिशून्यं हि संबन्धानवगाहि तत् प्रमात्वं न स्वतो ग्राह्यं संशयानुप
पत्तितः २६ व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा हेतुर्व्याप्तिग्रहे तर्कः
क्वचिच्छङ्कानिवर्तकः २७ साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा स
उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते २८ सर्वे साध्यसमानाधिकरणाः स्यु

का
१०

रूपाययः हेतैरेकाश्रयेयेषांस्वसाध्यव्यभिचारिता ४९ व्यभिचारस्यानुमानरूपा

येस्तप्रयोजनं शाब्दोपमानयोर्नैवपृथक्प्रामाण्यमिष्यते ५० अनुमानगता

र्थत्वादितिवैशेषिकंमतं तन्नसम्यक्विनाव्याप्तिबोधंशाब्दादिबोधतः ५१

द्वैविध्यमनुमानस्यकेवलान्वयिभेदतः द्वैविध्यंतुभवेद्व्याप्तेरन्वयव्यतिरेकतः ५२

अन्वयव्याप्तिरुक्तैवव्यतिरेकिण्योच्यते साध्याभावव्यापकत्वंहेत्वभावस्य

चेद्भवेत् ५३ अर्थापत्तिस्तुनैवेहप्रमाणान्तरमिष्यते व्यतिरेकव्याप्तिबुध्याच

अभिलाषविषयः

रितार्थोहिसायतः ५४ सुखंतुजगतामेवकाम्यंधर्मेणजन्यते अधर्मेणतु

दुःखंस्यात्प्रतिकूलंसचेतसां ५५ निर्दुःखत्वेसुखेचेच्छातज्ज्ञानादेवजायते २

केवलान्वयिकेवलव्यतिरेकि अन्वयव्यतिरेकि ४

वर्तमानयइत्यादौनिपदानिज्ञानपूर्वकाहि आकांक्षादिमत्पदकदम्बकत्वात् २

साध्याभावव्यापकीभूताभावप्रतियोगित्वम् ४

देवदत्तःरात्रौभुंक्ते दिवानभुंजानेसति पीनत्वात् यन्नैवंतन्नैवम् ३

१०

ज्ञातंतदुपायेस्यादिच्छोपायत्वधीर्यदि ४६ चिकीर्षाकृतिसाध्यत्वप्रकारेच्छातु
याभवेत् तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् ४७ बलवद्द्विष्टहेतुत्वम-
तिः स्यात्प्रतिबंधिका तद्धेतुत्वबुद्धेस्तु हेतुत्वंकस्यचिन्मते ४८ द्विष्टसाधन-
ताबुद्धिर्भवेद्द्वेषस्यकारणं प्रवृत्तिश्चनिवृत्तिश्चतथाजीवनकारणं ४९ एवंप्र-
यत्नत्रैविध्यंतांत्रिकैः परिदर्शितं चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा ५०
उपादानस्यचाध्यक्षंप्रवृत्तौजनकंभवेत् निवृत्तिस्तुभवेद्द्वेषाद्द्विष्टसाधनताधि-
यः ५१ यत्नोजीवनयोनिस्तुसर्वदातींद्रियोभवेत् शरीरेप्राणसंचारकारणं
तत्प्रकीर्तितं ५२ अतींद्रियंगुरुत्वंस्यात्पृथिव्यादिद्वयेभवेत् अनित्येतदनि-

का॰
११

त्वं स्यान्नित्ये नित्यमुदाहृतं ५३ तदेवासमवायि स्यात्पतनाख्येव कर्मणि सांसिद्धि
कं द्रवत्वं स्यान्नैमित्तिकमथापरं ५४ सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः
परमाणौ जले नित्यमन्यत्रानित्यमुच्यते ५५ नैमित्तिकं वह्नियोगात्तपनीयघृता
दिषु द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तत् ५६ स्नेहो जले स नित्योऽणावनित्यो
वयविन्यसौ तैलान्तरे तत्प्रकर्षाद्दहनस्यानुकूलता ५७ संस्कारभेदो वेगोऽथ
स्थितिस्थापकभावने मूर्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित् ५८ स्थिति
स्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देऽपि का
संस्कारस्य
रणं ५९ भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः उपेक्षानात्मकस्तस्य निश्च ११

यः कारणंभवेत् ९० स्मरणेप्रत्यभिज्ञायामप्यसौहेतुरुच्यते धर्माधर्मावदृष्टं
स्याद्धर्मः स्वर्गादिसाधनं ९१ यागादिर्गंगास्नानादिव्यापारः सतुकीर्तितः क
र्मनाशाजलस्पर्शादिनानाश्यस्त्वसौमतः ९२ अधर्मोनरकादीनांहेतुर्निन्दित
कर्मजः प्रायश्चित्तादिनाश्योसौजीववृत्तीत्विमौगुणौ ९३ इमौतुवासनाज
न्यौज्ञानादपिविनश्यतः शब्दोध्वनिश्चवर्णश्चमृदंगादिभवोध्वनिः ९४ कंठसं
योगादिजन्यावर्णास्तेकादयोमताः सर्वशब्दोनभोवृत्तिः श्रोत्रोत्पन्नस्तुगृह्यते
९५ वीचीतरंगन्यायेनतदुत्पत्तिस्तुकीर्तिता कदम्बगोलकन्यायादुत्पत्तिःकस्य
चिन्मते ९६ उत्पन्नः कोविनष्टः कइतिबुद्धेरनित्यता सोयंकइतिबुद्धिस्तुसा
जात्यमवलंबते ९७ तदेवौषधमित्यादौसजातीयेपिदर्शनात् ९८ इतिश्रीमन्म

का० १२

इति महोपाध्यायविस्वनाथपंचाननभट्टाचार्यविरचितायां मुक्तावलीकार
कापाठः संपूर्णम् ॥

कारिकावली, अथवा, मुक्ता-
वालन्याकार ॥ विश्वानाथ पंचान
भट्टाचर्य कृत ॥
१२ पत्रांक ॥ ल० भ० ६ पं० प्र० पृ०

ह० ला०

१२